M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref.
Sar. 1167

Title: Shri Chotka

1167

Complete

C

	Shree Chakra		Title
		Narayan Yogi	~~Author~~ scribe
			Editor
Sk			Year, Vols.
			Publisher
1167			Remarks

श्रीः गुरुभ्योनमः शरीरंचिंतयेद्धीमांश्रीचक्रस्वरूपकं. त्वगाद्या
धारनिर्मुक्तंज्वलत्कालाग्निसंनिभं. बैंदवंब्रह्मरंध्रेचतत्संधस्या
त्र्यस्रकं. ललाटे घारकंचक्रंभ्रुवोर्मध्येदशारकं. बहिर्दशा
रकंकंठेचहृदयेमनुपत्रकं. नाभौत्वष्टदलंपद्मंस्वाधिष्ठानेकु
लास्रकं. आधारेचतुरस्रंस्यात्तद्विलीयंदक्षजंघके. तृतीयं
वामजंघायांश्रीचक्रंपरिभावयेत्. बिंदुत्रिकोणवसुकोणद
शारयुग्मलोकपत्रयुतं. वसुदलकलास्रवृत्तंत्रिमही
गृहंभजेच्चक्रं. अमायामनहंकारमरागममदंतथा. अ
मोहकमदंभंचअद्वेषाक्षोभकौतथा. अमात्सर्यमलोभंच
दशपुष्पंविदुर्बुधाः. अहिंसापरमंपुष्पंपुष्पमिंद्रियनिग्र
हः. दयापुष्पंक्षमापुष्पंज्ञानपुष्पंचपंचमं. इत्येवमादिभिःपु
ष्पैस्तर्पयेत्परदेवतां. प्रथमावरणांते. प्रथमवृत्ते. डाकिनीश
क्तिः राकिनीशक्तिः २ मध्यवृत्ते. लाकिनीशक्तिः काकिनीशक्तिः २
तृतीयवृत्ते. साकिनीशक्तिः हाकिनीशक्तिः २ इतिप्रथमाव
रणं केचित्. अत्रमूलाधारादिचक्रषट्कंकुलपथइत्युच्य
ते. तदुपरितनंअकुलपथइति. पंचदशीविषये. मूलाधार १
स्वाधिष्ठान २ मणिपूर ३ अनाहत ४ विशुद्ध ५ आज्ञा ६ बिंदु ७
अर्धेंदु ८ रोधिनी ९ नाद १० नादांत ११ शक्ति १२ व्यापिका १३
समना १४ उन्मनी १५ षोडशीपक्षे ध्रुवमंडलं. पंचदशस्थानेषु
पंचदशाक्षराणितदूर्ध्वंसमस्तविद्यामयींचतुर्थस्वरात्मिकां
महाकामकलांविचिंत्यपंचदशकलाविलीनांभावयेत्. षोडश
कलाथ. यदाकलाविलीनास्यात्तदाह्रींसंकल्पविकल्पात्मकं
मनोस्तिष्ठतिसेयंतुरीयावस्था. सहस्रारेब्रह्मरंध्रेकर्पूर
धवलोगुरुः वराभयकरोनित्योभस्मरूपीसनातनः [redacted]. सो
हं इति. स्वशिरसिगुरुंतत्पादयोरात्मानंकंठेपीतवर्णांविद्यां
हृदयेपरदेवतांचध्यात्वा. आज्ञाचक्रे. गुर्वात्मविद्यादेव
तानांऐक्यंविभाव्यसुषुम्णामार्गेणतच्चतुष्टयमेकीभूतं
तेजः विशुद्धिचक्रेसमानीयतत्रपरदेवतारूपत्वेनक्षणंवि
भाव्यमूलेनहृदयमानीयतत्रध्यायन्मंत्रार्थंगुरुमुखा
दगतंअनुसंधानोजपेत्षट्त्रिंशल्लक्षंजपेत्. पुरश्चरणं
पंचदशलक्षंद्वादशलक्षंवानवलक्षंवा. त्रिमधुरसिक्तै
र्जपाकुसुमैररुणकरवीरैर्वा दशांशहोमः. नित्यशः वै
श्वदेवांते त्रिमधुरसिक्तैर[illegible]मंत्रांते पंचप्राणाहुतिमंत्रान्

[illegible] ब्रह्मरंध्रस्था

श्री

संयोऽप्य पंचाकृतीर्जुकुर्यात्. यस्मिन्मंत्रेय आचारस्तत्र धर्मस्तु
ता दृशः तेन धर्मेण जायेत स्वर्गो वा मोक्ष एव वा १ भ्रांतिस्तत्र
न कर्तव्या सिद्धि हानिस्तु जायते. स्वासनस्थान देवीस्थापो
रंतराले षोडृत्रिंशदंगुलं देशं प्रकल्प्य आधंतयो द्वादशांगुलं
त्यक्त्वा मध्यतन द्वादशांगुल देशे पात्रासादनं कुर्यात्. [redacted] व
स्वंगुल विहीनं तु हानपात्रं न कारयेत् इति दीपयत् दर्पेज्यो
तिरहं अस्तास्मिस्संयुतं. तदा प्रकाशाने देवी घटे दीपोज्वलं
लिख. १ मूलाधारादिस्थानानि. अपानवृषणयोमध्यं मूला
धारं. स्वाधिष्ठानं लिंगस्थानं. मणिपूरकं नाभिः। अनाह
तं हृदयं. विशुद्धिः कंठमूलं. आज्ञाभ्रूमध्यं. शिरोधिकाल
लाटेणरि केशारंभदेशः। अर्धेंदुः तस्योपरि प्रदेशः। तदुप
रि बिंदुस्थानं. तदुपरि कलपदस्थानं. तदुपरि नादांतस्था
नं. तदुपरि व्यापिनी स्थानं. तदुपरि समनास्थानं. तदुपरि
उन्मन्याः स्थानं. तदुपरि ध्रुवमंडलस्थानं. शिरस्यधोमुख
स्थितसहस्त्रदलकमलकर्णिकामध्यगत पूर्णशशिबिं
बे अकथादिक गर्भशिखांतं श्रृंगाटं अनुस्मृत्य आधा
रचतुर्दलकमले पूर्ववत् श्रृंगाटं विभाव्य तदधः कला तत्र
वह्निकुंडलिनीं लिंगाकारतया समुद्धास्य पदूशिरसि
अग्रंथिभेदक्रमेणात्पेपा यो निरूपां अमृतकुंडलिनी
मध्यं प्रवेश्य अमृतानलकुंडलिन्योः मिथोमिथुनस्वं
भूता रूपामृत सारैस्तु री यस्मारं स्मारं आत्मानं चिंत
येत्. श्रृंगाटं त्रिकोणं. हार्धकालाग्नितेत्रिकोणं इति
दिक्. योगिना नारायणेन लिखितं परार्थं